This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M93 विषय वैदिक.

नाव. त्रिकालसंध्या (mss).

लेखक/लिपीकार —.

पृष्ठ 5-25 काळ — पूर्ण/अपूर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रिकाल संध्या

हिष्ठेतिनवऋचस्यसूक्तस्यांबरिषःसिंधुद्वीप
ऋषिः॥आपोदेवता॥गायत्रीछंदः॥ पंचमीव
र्धमाना॥सप्तमीप्रतिष्ठा॥अंत्येद्वेअनुष्टुभौ॥मा
र्जनेविनियोगः॥ ॐ प्रथममार्जनं॥ॐ भूर्भुवः
स्वः द्वितीयमार्जनं॥ ॐ तत्सवितुर्वरेण्यंभर्गोदे
वस्यधीमहि॥धियोयोनःप्रचोदयात्॥तृतीय
मार्जनं॥ॐआपोहिष्ठामयोभुवस्तानऊर्जेदधा
तन॥महेरणायचक्षसे॥ ॐयोवःशिवतमोरस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रा·सं· स्तस्यभाजयतेहनः॥ उशतीरिवमातरः॥ ॐ
तस्मा अरंगमामवोयस्यक्षयायजिन्वथ॥
आपोजनयथाचनः॥ ॐ शन्नोदेवीरभिष्टय
आपोभवंतुपीतये॥ शंयोरभिस्रवंतुनः॥ ॐ
ईशानावार्याणांक्षयंतीश्चर्षणीनां॥ अपोया
चामिभेषजं॥ ॐ अप्सुमेसोमोअब्रवीदंतर्वि
श्वानिभेषजा॥ अग्निंचविश्वशंभुवं॥ ॐ आपः 5
पृणीतभेषजंवरूथंतन्वे३ मम॥ ज्योक्‌चसूर्यं

दृशे॥ ॐ इदमापःप्रवहतयत्किंचदुरितंमयि॥
यद्वाहमभिदुद्रोहयद्वाशेपउतानृतं॥ ॐ आ
पोअद्यान्वचारिषंरसेनसमगस्महि॥ पयस्वा
नग्नआगहितंमासंसृजवर्चसा॥ चतुर्थमार्जनं
॥ ॐ मापोज्योतीरसोमृतंब्रह्मभूर्भुवः सुवरों॥
मार्जनंएवंपंच॥ अघमर्षणंकुर्यात्॥ गोकर्णा
कारंहस्तंजलंधृत्वानासिकांतंनीत्वाप्राणान्नि
रुध्य॥ ऋतंचेतित्रचस्याघमर्षणऋषिः॥ भाव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वृतोदेवता अनुष्टुप्छंदः॥ अघमर्षणे विनियो
गः॥ ॐ ऋतं च सत्यं चाभीद्धात्तपसोध्यजाय
त॥ ततोरात्र्यजायत ततः समुद्रो अर्णवः॥
समुद्रादर्णवादधि संवत्सरो अजायत॥
अहोरात्राणि विदधद्विश्वस्य मिषतो व
शी॥ सूर्याचंद्रमसौ धाता यथा पूर्वमकल्प
यत्॥ दिवं च पृथिवीं चांतरिक्षमथो स्वः॥ वा
मभागे जलं क्षिपेत्॥ आचम्य केशवादिकृ

ष्णांताः नामभिरुच्चार्य॥ गायत्र्या विश्वामि
त्र ऋषिः॥ सविता देवता॥ गायत्री छंदः॥ अ
र्घ्यदाने विनियोगः॥ पाणिभ्यां जलमादाय
पूर्वाभिमुखस्तिष्ठन् ॐ भूर्भुवः स्वरिति त
त्सवितुर्वरेण्यं॰ श्रीसूर्यायेदमर्घ्यं समर्पया
मि॥ एवं त्रिः॥ उपविश्य कालातिक्रमदोष
परिहारार्थं चतुर्थार्घ्यं करिष्ये॥ तिष्ठन् च
तुर्थार्घ्यं दत्वा॥ असावादित्यो ब्रह्मइत्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रा॰सं॰

स्मानं प्रदक्षिणं परिषिच्य॥ हिरा-चम्यकेशवादि
कृष्णांताः नामभिरुच्चार्य कुशोदकेन जपस्था
नं प्रोक्ष्यासनं विन्यस्य॥ ॐ भूर्भुवः स्वरोमिति
जपित्वा पद्मासनेनोपविश्य॥ पृथ्वीतिमंत्रस्य
मेरुपृष्ठ ऋषिः कूर्मो देवता॥ सुतलं छंदः आस
ने विनियोगः॥ ॐ पृथ्वित्वया धृता लोका देवि
त्वं विष्णुना धृता। त्वं च धारय मां देवि पवित्रं कु
रु चासनं॥ अपसर्पंतु ते भूता ये भूता भूमि संस्थि
ताः॥ ये भूता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञया॥
अपक्रामंतु भूतानि पिशाचाः सर्वतो दिशं॥ स
र्वेषामविरोधेन ब्रह्मकर्म समारभे॥ प्राणायाम
त्रयं कृत्वा कर्णस्पर्शः॥ ॐ भूर्भुवः स्वः आत्मानं
प्रोक्ष्य॥ गायत्र्या विश्वामित्र ऋषिः॥ सविता देव
ता॥ गायत्री छंदः॥ न्यासे विनियोगः॥ ॐ तत्सवि
तुर्हृदयाय नमः॥ वरेण्यं शिरसे स्वाहा॥ भर्गो देव
स्य शिखायै वषट्॥ धीमहि कवचाय हुं॥ धियो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यो नः नेत्रत्रयाय वौषट्॥ प्रचोदयात् अस्त्राय फ
ट्॥ अस्त्रेणैव दिग्बंधनं कृत्वा देवतां ध्यायेत्॥
बालां बालादित्यमंडलमध्यस्थां रक्तवर्णां र
क्तांबरानुलेपनस्रगाभरणां चतुर्वक्त्रां दंडकमं
डलुवक्षसूत्राभयांक चतुर्भुजां हंसासनारूढां
ब्रह्मदैवत्यां ऋग्वेदमुद्राहरंतीं भूर्लोकाधिष्ठा
त्रीं गायत्रीं नाम देवतां ध्यायामि॥ आगच्छ वर
दे देवी जपे मे सन्निधा भव॥ गायंतं त्रायसे यस्मा

द्गायत्री हं ततः स्मृता॥ तिष्ठन् नाभिदेशे मालां ध
त्वा गायत्रीं जपेत्॥ उपविश्य पुनः षडंगं न्यासः
ॐ तत्सवितुर्हृदयाय॰ वरेण्यं शिरसे स्वा॰ भर्गो दे
वस्य शिखायै वषट्॥ धीमहि कवचाय हुं॥ धियो
यो नः नेत्रत्रयाय वौषट्॥ प्रचोदयात् अस्त्राय फ
ट्॥ तिष्ठन् उपस्थानं कुर्यात्॥ मित्रस्येति च नस्र
णां गाथिनो विश्वामित्रो मित्रो गायत्री॥ उपस्थाने
विनियोगः॥ ॐ मित्रस्य चर्षणी धृतो वो देवस्य सा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रा॰सं॰

नसि॥ द्युम्नं चित्रश्रवस्तमं॥ अभियो महिनादिवं मित्रो बभूव सप्रथाः॥ अभिश्रवोभिः पृथिवीं॥ मित्राय पंचयेमिरे जना अभिष्टिशवसे॥ सदेवान्विश्वान्बिभर्त्ति॥ मित्रो देवेष्वायुषु जनाय वृक्तबर्हिषे॥ इषइष्टव्रताअकः॥ जातवेदसे मारीचः कश्यपो जातवेदा अग्निस्त्रिष्टुप् उपस्थाने विनियोगः॥ ॐ जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः॥ सनः पर्षदति दुर्गाणि विश्वा नाव

१

व सिंधुं दुरितात्यग्निः॥ त्र्यंबकं वसिष्ठो रुद्रो नुष्टुप् उपस्थाने विनियोगः॥ ॐ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनं॥ उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात्॥ तच्छंयोः शंयुर्विश्वेदेवाः शाक्करी॥ उपस्थाने विनियोगः॥ ॐ तच्छंयोरावृणीमहे गातुं यज्ञाय गातुं यज्ञपतये॥ दैवी स्वस्तिरस्तु नः॥ स्वस्तिर्मानुषेभ्यः॥ ऊर्ध्वं जिगातु भेषजं॥ शन्नो अस्तु द्विपदे शं चतुष्पदे॥ नमो ब्रह्मण इत्यस्य प्रजापतिर्वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रा·सं· श्चै देवा जगती उपस्था॰ ॐ नमो ब्रह्मणे नमो
अस्त्वग्नयेनमः पृथिव्यैनम ओषधीभ्यः॥ नमो
वाचे नमो वाचस्पतये नमो विष्णवे महते करोमि
॥ प्राच्यैदिशे इंद्राय नमः आग्नेय्यैदिशे अग्न
येन॰ दक्षिणस्यैदिशे यमाय॰ नैऋत्यैदिशे नि
ऋतये न॰ प्रतीच्यैदिशे वरुणाय॰ वायव्यैदिशे
वायवे॰ उदीच्यै दिशे सोमाय॰ ऐशान्यैदिशे 10
ईश्वराय॰ ऊर्ध्वायैदिशे ब्रह्मणे॰ अधरस्यैदि
:

श्रीगणेशाय नमः॥ ॐ मध्यानसंध्याप्रारंभः॥
द्विराचम्य केशवादिकृष्णांताः नामभिरुच्चार्य
प्रणवस्य परब्रह्म ऋषिः॥ परमात्मा देवता दैवी
गायत्रीछंदः सप्तानां व्याहृतीनां विश्वामित्रज
मदग्निभरद्वाजगोतमात्रिवसिष्ठकश्यपा ऋष
यः अग्निवाय्वादित्यबृहस्पतिर्वरुणेंद्रविश्वे
देवादेवताः गायत्र्युष्णिगनुष्टुप्बृहतीपंक्तित्रि
ष्टुप्जगत्यश्छंदांसि॥ गायत्र्यागाथिनो विश्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मा॰सं॰ मित्र ऋषिः॥ सविता देवता गायत्री छंदः गायत्री
शिरसः प्रजापति ऋषिः ब्रह्माग्निवाय्वादित्या दे
वताः॥ यजुः छंदः प्राणायामे विनियोगः॥ ॐ
भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः
ॐ सत्यं ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि
॥ धियो यो नः प्रचोदयात्॥ ॐ आपोज्योती
रसोमृतं ब्रह्म भूर्भुवः सुवरों॥ एवं त्रिः॥ ममोपा ३२
त्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं मध्या

न्हसंध्यामुपासिष्ये॥ आपोहिष्ठेति त्र्यचस्यांब
रीषः सिंधुद्वीप आपो गायत्री मार्जने विनियोगः
॥ ॐ आपोहिष्ठा॰ ॐ तानऊ॰ ॐ महेर॰ ॐ
योवः शिवत॰ ॐ तस्य॰ ॐ उश॰ ॐ तस्मा॰ ॐ
यस्य॰ ॐ आपो॰ आपः पुनंत्विति मंत्रस्य ना
रायण ऋषिः आपो देवता॥ अ— छंदः मंत्रा
चमने विनियोगः॥ ॐ आपः पुनंतु पृथिवीं पृथि
वी पूता पुनातु मां॥ पुनंतु ब्रह्मणस्पतिर्ब्रह्म पूता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

म·से· पुनातुमां ॥ यदुच्छिष्टमभोज्यं यद्वादुश्चरितंमम ॥
सर्वंपुनंतुमामापोसतांचप्रतिग्रहं स्वाहा ॥ इति
मंत्रेणापःपिबेत् ॥ आचम्यकेशवादिकृष्णांता:
नामभिरुच्चार्य ॥ प्रणवस्यपरब्रह्म ऋषिःपरमा
त्मादेवतादेवीगायत्रीछंदः ॥ समस्तव्याहृती
नांप्रजापतिऋषिःप्रजापतिर्देवताबृहतीछंदः १४
गायत्र्याविश्वामित्रऋषिःसवितादेवतागायत्री
छंदः ॥ आपोहिष्ठेतिनवऋचस्यसूक्तस्यांबरी
:

षःसिंधुद्वीपऋषिःआपोदेवतागायत्रीछंदःपंचमी
वर्धमाना ॥ सप्तमीप्रतिष्ठा ॥ अंत्येद्वेअनुष्टुभौ ॥ मा
र्जनेवि ॥ ॐ प्रथममार्जनं ॥ ॐ भूर्भुवःस्वःइति
यमा० ॥ ॐ तत्सवितु० हि ॥ धियोयो० यातु ॥ त
तीयमा० ॥ ॐ आपोहि० महेरणा० ॐ योवः०
तस्यभा० ॥ उशतीरि० ॐ तस्मा० यस्यक्ष०
आपोजनय० ॐ शंनोदे० शंयोर० ॐ ईशाना०
अपोयाचा० ॐ अप्सुमे० अग्निंचवि० ॐ आपः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

म·सं·

पृणीतमे॰ ज्यो क॰ ॐ इदमा॰ यद्वाह॰ ॐ आ
पोअ॰ पयस्वान॰ चतुर्थमा॰॥ ॐ आपोज्योती
रसोमृतं ब्रह्मभूर्भुवः स्वुवरों मार्जनं एवं पं च॥ गो
कर्णोकारं हस्तं जलं धृत्वा नासिकाग्रं नीत्वा प्राणां
निरुध्य ऋतं चेतित चस्याघमर्षण ऋषिः भाव
वृत्तोदेवता अनुष्टुप्छंदः अघमर्षणे वि॰॥ ॐ
ऋतं च॰ ततोरा॰ समुद्रा॰ अहोरा॰ सूर्याचंद्र॰
दिवं च॰ स्वः वामभागे जलं क्षिपेत्॥ आचम्य के

शवादि कृष्णांताः नाम भिरुच्चार्य॥ अर्घ्यं हंसः शु
चिषदिति मंत्रस्य गोतमो वामदेवः सूर्यो जगती॥
अर्घ्यदाने वि॰॥ ॐ हंसः शुचिषद्वसुरंतरिक्षस
द्धोता वेदिषदतिथिर्दुरोणसत्॥ नृषद्वरसदृतस
द्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं॥ श्री
सूर्यायेदमर्घ्यं दत्तं न मम॥ एवं त्रिः सकृद्वार्घ्यं
दत्वा॥ अर्घ्य मंत्रे विकल्पः॥ आकृष्णेना गिर
स हिरण्यस्तूपः सविता त्रिष्टुप् अर्घ्यदाने वि॰॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मं॰ सं॰

ॐ आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च॥ हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्॥ श्री सूर्याये॰ मम॥ त्रिः सकृद्वा॥ असावादित्यो ब्रह्मेत्यात्मानं प्रदक्षिणं परिषिच्य॥ द्विराचम्य केशवादि कृष्णांताः नामभिरुच्चार्य॥ उदङ्मुखः ऊर्ध्वबाहुः सूर्यमुपतिष्ठेत्॥ उदुत्यमिति त्रयोदशर्चस्य सूक्तस्य॥ काण्वः प्रस्कण्व ऋषिः सूर्यो देवता॥ नवा

१८

द्या गायत्र्यः। अंत्याश्चतस्रोनुष्टुभः॥ चित्रं देवानामिति षडृचस्य सूक्तस्य आंगिरसः कुत्सः सूर्यस्त्रिष्टुप् सूर्योपस्थाने वि॰॥ ॐ उदुत्यं जातवेदसं देवं वहंति केतवः॥ दृशे विश्वाय सूर्यं॥ अप त्ये तायवो यथा नक्षत्रा यंत्यक्तुभिः॥ सूराय विश्वचक्षसे॥ अदृश्रमस्य केतवो विरश्मयो जनाँऽअनु॥ भ्राजंतो अग्नयो यथा॥ तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य॥ विश्वमाभासि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

म॰सं॰ रोचनं ॥ प्रत्यङ् देवानां विशः प्रत्यङ् दे षिमा
नुषान् ॥ प्रत्यङ् विश्वं स्वर्दृशे ॥ १ ॥ येना
पावक चक्षसा भुरण्यंतं जनाँ अनु ॥ त्वं व
रुण पश्यसि ॥ विद्यामेषि रजस्पृथ्व हामिमा
नो अक्तुभिः ॥ पश्यं जन्मानि सूर्य ॥ सप्त त्वा ह
रितो रथे वहंति देव सूर्य ॥ शोचिष्केशं विचक्षण १७
॥ अयुक्त सप्त शुंध्युवः सूरो रथस्य नप्त्यः ॥ ताभि
र्याति स्वयुक्तिभिः ॥ उद्वयं तमसस्परि ज्योतिष्पश्यं

त उत्तरं ॥ देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमं ॥ उद्यन्नद्य
मित्रमह आरोहन्नुत्तरां दिवं ॥ हृद्रोगं मम सूर्य हरि
माणं च नाशय ॥ शुकेषु मे हरिमाणं रोपणाकासु
दध्मसि ॥ अथो हारिद्रवेषु मे हरिमाणं नि दध्म
सि ॥ उदगादयमादित्यो विश्वेन सहसा सह ॥ द्विषं
तं मह्यं रंधयन्मो अहं द्विषते रधं ॥ २ ॥ चित्रं देवा
नामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ॥ आ
प्रा द्यावापृथिवी अंतरिक्षं सूर्य आत्मा जगतस्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

म·सं· स्थुषश्च॥ सूर्यौ देवीमुषसं रोचमानां मर्यौ न यो
षामभ्येति पश्चात॥ यत्रा नरो देवयंतो युगानि॥
वितन्वते प्रति भद्राय भद्रं॥ भद्रा अश्वा हरितः सू
र्यस्य चित्रा एतग्वा अनुमाद्यासः॥ नमस्यंतो
दिव आपृष्ठमस्थुः परिद्यावापृथिवी यंति स
द्यः॥ तत्सूर्यस्य देवत्वं तन्महित्वं मध्या कर्तोर्वि १८
ततं संजभार॥ यदेदयुक्त हरितः सधस्थादाद्रा
त्री वासस्तनुते सिमस्मै॥ तन्मित्रस्य वरुणस्या
:

सा·सं· क्रगदापद्मांक चतुर्भुजां गरुडासनारूढां विष्णु
देवत्यां सामवेदमुदाहरंतीं स्वर्लोकाधिष्ठात्रीं स
रस्वतीं नाम देवतां ध्यायामि॥ मनसा संपूज्य
उपविश्य नासिकाग्रे मालां धृत्वा यथाशक्ति
गायत्रीं जपेत॥ तत्सवितुर्हृदयाय॰ वरेण्यं शि
रसे स्वाहा॰ भर्गो देवस्य शिखायै॰ धीमहि कवचा २५
य हुं॥ धियो यो नः नेत्रत्रयाय॰ प्रचोदयात अस्त्रा
य॰ पश्चिमाभिमुखस्तिष्ठन् उपस्थानं कुर्यात्॥
:

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

(5)

भिरुत्थायपश्चिमाभिमुखस्तिष्ठन्॥ गायत्र्याविश्वामित्रऋषिःसविता देवता गायत्रीछंदः॥अर्घ्यदाने विनियोगः हस्ताभ्यां जलमादाय॥ॐ भूर्भुवःस्वः तत्सवितु० श्रीसूर्यायेदमर्घ्यंसमर्पयामि॥ त्रिरर्घ्यं दत्वा॥ उपविश्यकालातिक्रमणदोषपरिहारार्थं चतुर्थार्घ्यं करिष्ये॥ चतुर्थार्घ्यं दत्वा॥ असावादित्यात्मानं प्रदक्षिणं परिषिच्य द्विराचम्यकेशवादिकृष्णांताः नामभिरु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सा॰सं॰ च्चार्य॥ कुशोदकेन जपस्थानं प्रोक्ष्यासनं वि
न्यस्य॥ ॐ भूर्भुवः स्वरोमिति जपित्वा पद्मा
सनेनोपविश्य॥ पृथ्वीतिमंत्रस्य मेरुपृष्ठ
ऋषिः कूर्मो पृष्ठो देवता सुतलं छंदः आ
सने विनियोगः॥ ॐ पृथ्वित्व॰ त्वं च धारय
मां॰ अपसर्पं॰ ये भूता॰ अपक्रामं॰ सर्वेषा
मं॰ ब्रह्मकर्म समारभे॥ प्रणवस्य प॰॥ प्राणा २५
यामत्रयं कृत्वा कर्णस्पर्शः॥ ॐ भूर्भुवः स्वरों
:

आत्मानं संप्रोक्ष्य गायत्र्या विश्वामित्र ऋषिः
सविता देवता गायत्री छंदः न्यासे जपे विनि॰॥
ॐ तत्सवितुर्हृदयाय॰ वरेण्यं शिरसे स्वा॰ भ
र्गो देवस्य शिखायै॰ धीमहि कवचा॰ धियो
यो नः नेत्रत्र॰ प्रचोदयात् अस्त्राय फट्॥ अ
स्त्रेणैव दिग्बंधनं कृत्वा देवतां ध्यायेत्॥ रक्तां
रक्ता दित्यमंडलमध्यस्थां श्यामवर्णां श्यामां
बरानुलेपनस्त्रगाभरणां एकवक्त्रां शंखच

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=07.08.19 13:50
,TRANSFERRED=2019/08/07 at 13:58:43
,PAGES=16
,TYPE=STD
,NAME=S0001375
,Book Name=M-93-TRIKAVAY SANDHYA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection